**अज्ञानाधारता** (ajñānādhāra-tā) *f.* the nature of being the locus or abode of nescience अज्ञानाधारतावच्छेदकत्वस्यैवारोप्यसंबन्धावच्छेदकत्वे नियामकत्वात् GuruCandr. i. 52. 18; अज्ञानमूलकभ्रमविशेष्यतावच्छेदकरूपावच्छिन्नस्यैवाज्ञानाधारतावच्छेदकत्वात् LaCandr. 651. 27.

**अज्ञानाधिकरण** (ajñānādhikaraṇa) *n.* locus or abode of nescience अज्ञानाधिकरणस्थूलकालमादाय न जानामीति बुद्धयापत्तेः GuruCandr. iii. 37. 17.

**अज्ञानाधीन** (ajñānādhīna) *adj.* dependent on nescience संसारः सत्योऽप्यज्ञानाधीन इत्युक्तेः Nyāyāmr̥. 292B. 11; जीवत्वमज्ञानाधीनम् GuruCandr. iii. 12. 12; LaCandr. 578. 25.

**अज्ञानाधीनत्व** (ajñānādhīna-tva) *n.* the state of being dependent on nescience साक्षिगतबाधकताया अज्ञानाधीनत्वे Nyāyāmr̥. 173A. 8.

**अज्ञानाधीनभ्रम** (ajñānādhīna-bhrama) *m.* erroneous cognition caused by nescience अज्ञानाधीनभ्रमस्य तेन रूपेण ज्ञानादेव बाधात् GuruCandr. i. 371. 15.

**अज्ञानाध्यक्ष** (ajñānādhyakṣa) *n.* perception of nescience दुरन्तध्वान्तनाशायाज्ञानाध्यक्षोपपादनम् GuruCandr. ii. 406. 15.

**अज्ञानाध्यारोपण** (ajñānādhyāropaṇa) *n.* superimposition of nescience अज्ञानाध्यारोपणनिवृत्तिरेव आत्मानमेवावेदित्युक्तम् BrĀraUBh. 131. 18 (*on* i. 4. 10)

**अज्ञानाध्यास** (ajñānādhyāsa) *m.* superimposition of nescience अज्ञानाध्यासाधीनसिद्धिकत्वादन्यस्य सर्वस्य सविकल्पकसंपादकस्य वस्तुनः VivaPraSaṁ. 104. 15; अज्ञानाध्यासविशिष्टचैतन्येऽहंकाराध्यासः SiddhāBi. 38. 7; अज्ञानाध्यासस्य सविकल्पकतापत्त्या सुषुप्तानुभवत्वहान्यापत्तेः GuruCandr. ii. 78. 21; अज्ञानाध्यासस्य ··· निर्विशेष्यकत्वात् LaCandr. 465. 26.

**अज्ञानानङ्गीकार** (ajñānānaṅgīkāra) *m.* non-acceptance of nescience जडे च प्रमाणप्रयोजनाभावेनाज्ञानानङ्गीकारात् SiddhāBi. 52. 5.

**अज्ञानाननुविद्ध** (ajñānānanuviddha) *adj.* not associated with nescience ब्रह्मशब्दप्रवृत्तिनिमित्तभूतब्रह्मत्वनिरुक्तौ ··· अज्ञानाननुविद्धनिरतिशयज्ञानदुःखाननुविद्धनिरतिशयसुखादिमत्त्वं च S'ivārkaMaDi. i. 94. 2 (*on* i. 1. 1)

**अज्ञानानन्तफल** (ajñānānantaphala) *adj.* resulting endlessly in ignorance वितर्का हिंसादयः ··· दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम् YogSū. 2. 34.

**अज्ञानानन्दरूप** (ajñānānandarūpa) *adj.* of the form of what is not knowledge and (not) happiness अथ ज्ञानानन्दयोरज्ञानानन्दरूप एवाश्रयो दृष्ट इति S'atDū. 201. 9.

**अज्ञानानपेक्ष** (ajñānānapekṣa) *adj.* not dependent on nescience अज्ञानानपेक्षस्य चात्मनः स्वत एव स्वरूपसिद्धेः NaiṣkSi. 106. 2.

**अज्ञानानभिभावकत्व** (ajñānānabhibhāvaka-tva) *n.* the state of that which does not suppress or remove nescience शुक्तिरजतस्थले इदमाकारवृत्तेरज्ञानानभिभावकत्वात् SiddhāLeSaṁ. 185. 6.

**अज्ञानानभ्युपगम** (ajñānānabhyupagama) *m.* non-acceptance of nescience जडेऽज्ञानानभ्युपगमेनान्तःकरणवृत्तिलक्षणप्रमाणज्ञानानाम् ··· तत्र सद्भावाद् अनैकान्तिकत्वात् Vādā. 24. 5; जडे च प्रमाणप्रयोजनाभावेनाज्ञानानङ्गीकारात् (v. l. अज्ञानानभ्युपगमात्) SiddhāBi. 52. 5.

**अज्ञानानर्थक्य** (ajñānānarthakya) *n.* purposelessness of nescience नास्त्येव जन्यत्वमिति चेन्न। अज्ञानानर्थक्यप्रसङ्गात् SiddhāTa. 56. 8.

**अज्ञानानवच्छिन्न** (ajñānānavacchinna) *adj.* not delimited by nescience चैतन्यं स्वरूपेणापरिच्छिन्नमपि अनादिभावरूपाज्ञानस्य चिन्मात्रनिष्ठत्वेन व्यापकत्वात् तदवच्छिन्नं सत् साक्षिरूपतामापन्नं साक्षिरूपेणैवावतिष्ठते न त्वज्ञानानवच्छिन्नं पृथगिति ViraMi.(Bhakti.) 168. 19.

**अज्ञानानवच्छिन्नत्व** (ajñānānavacchinna-tva) *n.* nature of not being delimited by nescience न हि सुषुप्तिकाले ··· अज्ञानानवच्छिन्नत्वमप्यस्ति AdvaiSi. 810. 17.

**अज्ञानानवच्छेदकता** (ajñānānavacchedaka-tā) *f.* the state of not being the delimiting factor of nescience सामान्यस्य ज्ञाततवादेवाज्ञानानवच्छेदकतया Nyāyāmr̥. 360B. 7.

**अज्ञानानात्मक** (ajñānānātma-ka) *adj.* not consisting of nescience जीवन्मुक्तभोगादिकमज्ञानानात्मकमपि न तल्लेशात्मकम् GuruCandr. i. 144. 24 = LaCandr. 290. 10.

**अज्ञानानाविष्करण** (ajñānānāviṣkaraṇa) *n.* non-exhibition of ignorance अज्ञानानाविष्करणे त्वननुभाषणमेव TārkiRa. 350. 14.

**अज्ञानानाश** (ajñānānāśa) *m.* non-destruction of nescience नातोऽद्वैतहानिरज्ञानानाशश्च IṣṭaSi. 375. 15.

**अज्ञानानाश्रयत्व** (ajñānānāśraya-tva) *n.* the state of not being the locus or abode of nescience अहमर्थस्याज्ञानानाश्रयत्वेन कथमयं प्रत्ययः ··· उपपद्यते AdvaiSi. 548. 3; ब्रह्मणोऽपीति। अज्ञानानाश्रयत्वेऽपीति शेषः GuruCandr. iii. 12. 9 = LaCandr. 578. 24.

**अज्ञानानाश्रितत्व** (ajñānānāśrita-tva) *n.* the state of not having nescience as the support or locus न हि ज्ञातृत्वाद्यसोऽज्ञानाश्रयत्वे प्रयोजकः। ··· किं तु प्रसक्तप्रकाशत्वमज्ञानानाश्रितत्वं च AdvaiSi. 578. 12.

**अज्ञानानिवर्तक** (ajñānānivartaka) *adj.* [*f.* -ikā] not removing nescience अथ तान्यज्ञानानिवर्तकानि (शुक्तिज्ञानानि) अनर्थकानि तर्हि IṣṭaSi. 63. 23; प्रमाणपरं प्रमाणवृत्तेरेव पक्षत्वेन सुखादिप्रमायाम् ··· अज्ञानानिवर्तिकायां बाधवारणाय AdvaiSi. 562. 3.

**अज्ञानानिवर्तकता** (ajñānānivartaka-tā) *f.* the state of not being the remover of nescience न च पूर्वज्ञानस्य कर्मणा प्रतिबन्धादज्ञानानिवर्तकतेति युक्तम् Nyāyāmr̥. 639B. 10; वृत्तिमात्रस्याज्ञानानिवर्तकतया ··· वृत्तिप्रतिबिम्बितचैतन्यावश्यकत्वेन फलव्याप्यत्वात् GuruCandr. i. 146. 1.

**अज्ञानानिवर्तकत्व** (ajñānānivartaka-tva) *n.* the state of not being the remover of nescience (सुखादिप्रमा) तस्याः साक्षिरूपत्वेनाज्ञानानिवर्तकत्वात् Nyāyāmr̥. 319A. 7; 364A. 5; आपातदर्शनस्य प्रतिबद्धत्वेनाज्ञानानिवर्तकत्वात् AdvaiSi. 691. 10; 263. 3; इदमाकारवृत्तेरज्ञानानिवर्तकत्वेऽपि न क्षतिः GuruCandr. iii. 181. 21 = LaCandr. 654. 35.

**अज्ञानानिवृत्ति** (ajñānānivr̥tti) *f.* non-removal of nescience शुक्तिज्ञानेनाज्ञानानिवृत्तौ Nyāyāmr̥. 288B. 6; 315B. 8; ब्रह्मणो मननादेः प्रागज्ञानानिवृत्तावस्पष्टता अनन्तरं तन्निवृत्तौ स्पष्टता SiddhāLeSaṁ. 218. 2; 17. 6; चैत्रो ब्रह्मेति वाक्यजबुद्धयाज्ञानानिवृत्तेः शक्तिविशेषेण मूलाज्ञाननाशकत्वावश्यकत्वात्क-(? त्का)रणविशेषणादिनिवेशे गौरवं नेति भावः GuruCandr. iii. 43. 21; LaCandr. 591. 31.

**अज्ञानानुच्छेद** (ajñānānuccheda) *m.* non-removal of nescience अज्ञानानुच्छेदे तत्कार्यस्य ··· उत्तरज्ञानेन निवृत्तिसंभवात् LaCandr. 654. 24.

**अज्ञानानुद्भावन** (ajñānānudbhāvana) *n.* not revealing ignorance, non-manifestation of ignorance अज्ञानानुद्भावनवद्विच्छेदोऽपि कथायां विवक्षितः TārkiRa. 348. 2.

**अज्ञानानुन्मज्जन** (ajñānānunmajjana) *n.* non-emergence of ignorance न च ··· अज्ञानानुन्मज्जनं तु ··· युक्तमिति वाच्यम् Nyāyāmr̥. 633B. 5.

**अज्ञानानुपमर्द** (ajñānānupamarda) *m.* absence of destruction of nescience अज्ञानानुपमर्देन व्याकृतिर्यास्य जायते BrĀraUBhVā. i. 2. 132.

**अज्ञानानुपहित** (ajñānānupahita) *adj.* not delimited by nescience अज्ञानानुपहितं तु बिम्बचैतन्यं शुद्धमिति संक्षेपशारीरककाराः SiddhāBi. 46. 3; 50. 3.

**अज्ञानानुपादानक** (ajñānānupādāna-ka) *adj.* not having nescience as the material cause प्रपञ्चोऽज्ञानवदज्ञानानुपादानक इत्यपास्तम् GuruCandr. ii. 324. 3.

**अज्ञानानुपादानकत्व** (ajñānānupādānaka-tva) *n.* the state of not having ignorance as the material cause सद्योमुक्तिपरिजिहीर्षया प्रतिविषयमज्ञानभेदे वा अध्यासस्याज्ञानानुपादानकत्वे वाङ्गीक्रियमाणे कल्पनागौरवाध्याससत्यत्वे प्रसज्येयाताम् VivaPraSaṁ. 24. 6; तस्याज्ञानानुपादानकत्वे ज्ञानान्निवृत्तिर्न स्यात् Nyāyāmr̥. 300A. 8; AdvaiSi. 544. 3; 848. 1; आकाशादेरज्ञानानुपादानकत्वेऽपि व्यावहारिकदृश्यनाशे मूलाज्ञाननिवृत्तेर्हेतुत्वकल्पनात् GuruCandr. ii. 314. 16 = LaCandr. 528. 22.

**अज्ञानानुपादेयत्व** (ajñānānupādeya-tva) *n.* the state of being what is not to be produced from nescience अवस्थानामनादित्वेनाज्ञानानुपादेयत्वात् GuruCandr. ii. 156. 24.

**अज्ञानानुप्रवेश** (ajñānānupraveśa) *m.* penetration into (i. e. association with) nescience एकस्यैव चिद्धातोरज्ञानानुप्रवेशेन प्रमातृत्वाद्यध्यासशालित्वं संसारः PrakaVi. 4. 15.

**अज्ञानानुबन्ध** (ajñānānubandha) *m.* association with nescience प्रत्येकमज्ञानानुबन्धश्च ··· तेन मुह्यन्ति जन्तवः इत्यादिश्रुतिº ··· ºसिद्धेः ··· नापलपमर्हति PrakaVi. 4. 5.

**अज्ञानानुभव** (ajñānānubhava) *m.* experience or realisation of nescience or ignorance अज्ञान्यसि न जानामीति चाज्ञानानुभवो यथा पुंसो भवति नैवं जडस्य स्यात् IṣṭaSi. 194. 3; अज्ञानानुभवस्याश्रयविषयभूतप्रत्यगर्थानुभवपुरस्सरत्वात् NītiMā. 22. 23; जागरितावस्थायामेवाज्ञानानुभवोऽयमिति संप्रदायः S'rutaPra. iB. 8. 18 (*on* i. 1. 1); सुषुप्तिमरणमूर्च्छाद्यहंकारविलयदशायामज्ञानानुभवभङ्गप्रसङ्गात् S'atDū. 105. 26; विशदः स्वरूपावभास एवाज्ञानविरोधी नाज्ञानेन सह भासत इत्याश्रयविषयज्ञाने सत्यपि नाज्ञानानुभवविरोधः SarvaDaSaṁ. 4. 73; SiddhāLeSaṁ. 152. 1; GuruCandr. iii. 41. 23; ii. 336. 22.